Total No. of Questions :6 ] [ Total No. of Printed Pages : 2

**Code No. : BSLK-04**

# स्नातकपरीक्षाः–२०१६

## बि.ए. – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्– साहित्यशास्त्रम्

**भागः - २, पत्रिका -३**

## विषयः - चन्द्रालोकः (पञ्चममयूखः)

**दिनाङ्कः** - 03-04-2016 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 100

---

**I. एषु पञ्च प्रश्नाः समाधेयाः ।** **05 x 06=30**

१. अलङ्कारो नाम कः ? स कतिधा विभक्तः ? विवृणुत ।

२. यमकानुप्रासयोः भेदः कः ? सोदाहरणं निरूपयत ।

३. उपमायाः घटकांशाः के के ? सोदाहरणं विवृणुत ।

४. उत्प्रेक्षां लक्षयित्वा लक्ष्ये सङ्गमयत ।

५. 'पङ्कजं पश्यतस्तस्य मुखं मे गाहते मनः' इत्यत्र कोऽलङ्कारः ? कथम् ? विवृणुत ।

६. परिकराङ्कुरस्य लक्षणमभिधाय सङ्गमयत लक्ष्ये ।

७. 'शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः' इति कस्यालङ्कारस्य उदाहरणम् ? कुतः ? विवेचयत ।

८. व्याजस्तुत्यलङ्कारं सलक्ष्यं निरूपयत ।

९. 'अप्यन्धकारिणानेन जगदेतत्प्रकाशते' इत्यत्र विद्यमानमलङ्कारं सलक्षणं विवृणुत ।

१०. सालङ्कारं सोदाहरणं विवृणुत ।

**II. एकवाक्येनोत्तरं लिखत ।** **10 x 01=10**

१. लाटानुप्रास इति नाम किमर्थं दत्तम् ?

२. एकस्यैव उपमानोपमेयत्वे कोऽलङ्कारः ?

३. 'स्त्रीभिः कामः प्रियैश्चन्द्रः' इत्यत्र कोऽलङ्कारः ?

४. सामान्यालङ्कारस्य उदाहरणं किम् ?

५. 'जितोऽसि मन्दकन्दर्प' इतीदं वक्ता कथं समर्थयति ।

–अनुवर्तते

६. ‘सङ्कुचन्ति सरोजानि स्वैरिणीवदनानि च’ अत्रालङ्कारः कः ?

७. बिम्बप्रतिबिम्बभावस्य लक्षणं किम् ?

८. यत्र विशेष-सामान्य-विशेषाः भवन्ति तत्र कोऽलङ्कारः ?

९. ‘को वेद गोपशिशुकः शैलमुत्पाटयिष्यति- अत्र कोऽलङ्कारः ?

१०. व्याघातस्य लक्षणं किम् ?

**III. रूपकं सप्रभेदं सोदाहरणं सम्यक् विशदयत** **1x 10=10**

**IV. एषु द्वयोः परस्परं वैलक्षण्यं सोदाहरणं लिखत ।** **02x 10=20**

१. प्रहर्षणम् - विषादनम्

२. समम् - विषमम्

३. उत्तरम् - पिहितम्

४. सारः - उदारसारः

**V. एषु द्वयोः प्रश्नयोः उत्तरं लिखत ।** **02x 10=20**

१. अपह्नुतिं सप्रभेदं निरूप्य लक्ष्ये सङ्गमयत ।

२. सम्बन्धातिशयोक्तिं अत्यन्तातिशयोक्तिं च सोदाहरणं लिखत ।

३. श्लेषो नाम कः ? सप्रभेदं सोदाहरणं निरूपयत ।

४. अप्रस्तुतप्रशंसायां कार्य-कारण-प्रतीतिप्रयुक्तान् भेदान् सलक्षणं निरूपयत ।

**VI. यथानिर्देशं लिखत ।** **02x 05=10**

१. जयदेवस्य देश-काल-कृतिविषये लिखत ।

२. अनन्वय-उपमेयोपमयोः विभिन्नतां सम्यक्प्रतिपादयत ।

—०—

Total No. of Questions :5 ]                                                [ Total No. of Printed Pages : 2

**Code No. : BFLK-05**

# स्नातकपरीक्षाः—२०१६

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्— साहित्यशास्त्रम्

### भागः - २, पत्रिका -४

### विषयः - दरिद्रचारुदत्तम्

**दिनाङ्कः** - 05-04-2016 ]                                                [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ]                                        [ Max. Marks : 100

---

**I. एषु पञ्च प्रश्नाः समाधेयाः ।**                                        **06 x 05=30**

१. भासविरचितानां नाटकानां नाम लिखत ।

२. भासस्य कालं सप्रमाणं निर्दिशत ।

३. चारुदत्तो दरिद्रतां कथं वर्णयति ?

४. सज्जलकः चौर्यं किमर्थं करोति ? कथं च ?

५. संवाहकः कः ? स किमर्थं द्यूतासक्तः ? तत्परिणामः कः ?

६. शकारः कः ? तस्य मौर्ख्यं सप्रमाणं निरूपयत ।

७. मैत्रेयः कः ? स किमर्थं वसन्तसेनागृहं गच्छति ?

८. चारुदत्तनाटके कवेः उपमाप्रयोगनैपुण्यं द्वित्रैः उदाहरणैः निरूपयत ।

९. गणिकाऽपि वसन्तसेना धनस्य प्रामुख्यं न ददाति- समर्थयत सप्रमाणम् ।

१०. स्थापनायां विद्यमानं कथाभागं विलखत ।

**II. एकवाक्येनोत्तरं लिखत ।**                                        **10 x 01=10**

१. 'विभवानुवशा भार्या'- कस्य ?

२. कस्मात् पुरुषस्य वाक्ये बान्धवजनो न सन्तिष्ठते ?

३. कस्य नेत्रे बुभुक्षया चञ्चलायेते ?

४. पुरुषस्य सोच्छ्वासं मरणं किम् ?

५. वसन्तसेना कीदृशं चारुदत्तं कामयते ?

६. दृष्टिः केव निष्फलतां गता ?

–अनुवर्तते

७. का वस्त्रान्तेन दीपं निर्वापयति ?

८. 'अभिजनेन गणिका न शीलेन' इति कोऽभिप्रैति ?

९. संवाहकस्य जन्मभूमिः का ?

१०. सन्धिं कृत्वा चारुदत्तगृहं कः प्रविष्टः ?

**III. प्रश्नस्य सविस्तरमुत्तरं लिखत ।** **1x 10=10**

१. 'भासो हासः'- यथानाटकं समर्थयत ।

**IV. (अ) एषु वाक्यद्वयं सप्रसङ्गं विवृणुत ।** **10x 02=20**

१. कोन्विदानीं आर्यायाः उपवासस्योपदेशिकः ?

२. मया ब्रह्मत्वेन शापितोऽसि, यदि न गृह्णासि ।

३. भाग्यक्रमेण हि धनानि पुनर्भवन्ति ।

४. दास्याः पुत्रेण पादौ धौतौ मुखमपि धौतम् ?

**(आ) एषु द्वयोः सप्रसङ्गं भावार्थं विवृणुत ।** **10x 02=20**

१. तरुणजनसहायश्चिन्त्यतां वेशवासो विगणय गणिका त्वं मार्गजाता लतेव ।
वहसि हि धनहार्यं पण्यभूतं शरीरं समुपचर भद्रे सुप्रियं चाप्रियं च ॥

२. उदयति हि शशाङ्कः कामिनीगण्डपाण्डुर्ग्रहगणपरिवारो राजमार्गप्रदीपः ।
तिमिरनिचयमध्ये रश्मयो यस्य गौरा हृतजल इव पङ्के क्षीरधारा पतन्ति ॥

३. इयं हि निद्रा नयनावलम्बिनी ललाटदेशादुपसर्पतीव माम् ।
अदृश्यमाना चपला जरेव या मनुष्यवीर्यं परिभूय वर्धते ॥

४. यं विश्वासं समालम्ब्य न्यासोऽस्मासु कृतस्तथा ।
तस्यैतन्महतो मूल्यं प्रत्ययस्य प्रदीपताम् ॥

**V. टिप्पणीं रचयत ।** **05x 02=10**

१. ब्राह्मणी

२. वसन्तसेना

—०—

Total No. of Questions :4 ] [ Total No. of Printed Pages : 2

**Code No. : BFLK-04**

# स्नातकपरीक्षाः—२०१६

## बि.ए. – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्– साहित्यशास्त्रम्

### भागः - २, पत्रिका -३

### विषयः - काव्यप्रकाशः

**दिनाङ्कः** - 03 -04-2016 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. एकेन वाक्येन उत्तरं दत्त ।** **10 x 01=10**

१. अनलङ्कृती पुनः क्वापि - कोऽर्थः ?

२. चित्रकाव्यलक्षणं किम् ?

३. मातः गृहोपकरणमद्य-अस्मिन् श्लोके किं व्यज्यते ?

४. न हि गौः स्वरूपेण गौर्नाप्यगौः । गोत्वाभिसम्बन्धात्तु गौः- इदं कस्मात् ग्रन्थात् उद्धृतम् ?

५. तच्च गूढमगूढं वा-अत्र तच्चेति किम् ?

६. भात्यत्र परमेश्वर इत्यत्र परमेश्वरशब्दस्य राजार्थकत्वं कथं निर्णीयते ?

७. तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
--गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु-अत्र किं व्यज्यते ?

८. स्वरेण अर्थनियन्त्रणं कुत्र ?

९. मध्यमकाव्यस्य लक्षणं किम् ?

१०. पीनो देवदत्तः दिवा न भुङ्क्ते इत्यत्र रात्रिभोजनस्य प्रतीतिः लक्षणया कुतो न भवति ?

**II. द्वित्रवाक्यैः समाधत्त** **05 x 2=10**

१. कान्तासंमिततयोपदेशयुजे- कोऽर्थः ?

२. कर्मणि कुशलः- अत्र कस्य कस्मिन्नर्थे लक्षणा ?

३. उपदिशति कामिनीनां यौवनमद एव ललितानि-अत्र केन पदेन अगूढतया किं व्यज्यते ?

४. एवमप्यनवस्था स्याद्-कदा ?

५. नियतिकृतनियमरहिताम्- कोऽर्थः ?

–अनुवर्तते

**III. यथारुचि अष्टौ उत्तरयत ।** **08x 05=40**

१. मङ्गलपद्यं व्याख्यात ।

२. निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे
वापीं स्नातुमितो गतासि न पुनरस्तस्याधमस्यान्तिकम्- पद्यमिदं सप्रसङ्गं व्याख्यात ।

३. तात्पयार्थोऽपि केषुचित्- क आशयः ?

४. पश्य निश्चलनिष्पन्दा बिसिनीपत्रे राजते बलाका ।
निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव ॥ पद्यमिदं सप्रसङ्गं व्याख्यात ।

५. सिद्धोऽपि द्विविधः । पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च-विवृणुत ।

६. आयुर्घृतम्, आयुरेवेदम्-अनयोः कः भेदः ?

७. क्वचित् तादर्थ्यादुपचारः । यथा इन्द्रार्था स्थूणा इन्द्रः-सप्रसङ्गं व्याख्यात ।

८. हेत्वभावान्न लक्षणा- के ते कस्य कस्या वा हेतवः ?

९. रामार्जुनगतिस्तयोरित्यत्र रामशब्दस्य भार्गवार्थकत्वं कथं सिद्ध्यति ?

१०. अतिपृथुलं जलकुम्भं गृहीत्वा इति श्लोके कस्य कस्या वा वैशिष्ट्यात् किं व्यज्यते ?

**IV. यथाग्रन्थं चतुरः विवृणुत** **04x 10=40**

१. काव्यस्य प्रयोजनं कारणं च किम् ?

२. सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते- कथम् ?

३. सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा- कथम् ?

४. लक्षणास्वरूपं दर्शयत ।

५. व्यञ्जनां समर्थयत ।

६. अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम्-विवृणुत ।

७. भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखविग्रहस्य ।
यस्यानुपप्लुतगतेः परवारणस्य दानाम्बुसेवकसुभगः सततं करोऽभूत् ॥ सप्रसङ्गं व्याख्यात ।

८. वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः ।
प्रस्तावदेशकालादेर्वैशिष्ट्यात् प्रतिभाजुषाम् ।
योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा- सार्थकारिकामिमां व्याख्याय कालान्यसन्निध्योरन्य-
तरस्योदाहरणं विशदयत ।

—०—

Total No. of Questions :4 ] [ Total No. of Printed Pages : 2

**Code No. : BSLK-05**

# स्नातकपरीक्षाः–२०१६

## बि.ए. – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्– साहित्यशास्त्रम्

### भागः - २, पत्रिका -४

### विषयः - रघुवंशः

**दिनाङ्कः** - 05 -04-2016 ] [ **गरिष्ठाङ्काः - १००**

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 100

---

**I. उत्तरं लिखत ।** **10 x 1=10**

१. भूपतेः बाष्पबिन्दवः कस्योपरि निपेतुः ?

२. राघवाय बलातिबलविद्यां कः उपदिष्टवान् ?

३. कौशिकः कुतो रामं याचितवान् ?

४. भर्तृशापाच्छिलात्वं प्राप्ता का ?

५. रघुवंशकाव्ये कति सर्गाः सन्ति ?

६. जगतः पितरौ कौ ?

७. कैकेयीपुत्रः कः ?

८. जनकसुता का ?

९. दशरथस्य कति पुत्राः ? के ते ?

१०. भृग्वादय ऋषयः केन अनुगृहीताः ?

**II. अष्टौ सप्रकरणं व्याख्यात** **08 x 05=40**

१. सैकताम्भोजबलिना जाह्नवीव शरत्कृशा ।

२. उवास प्रतिमाचन्द्रः प्रसन्नानामपामिव ।

३. बभूव कृतसंस्कारा चरितार्थैव भारती ।

४. ज्योतिर्मयं विचिन्वन्ति योगिनस्त्वां विमुक्तये ।

५. सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः ।

६. लोकमन्धतमसात्क्रमोदितौ रश्मिभिः शशिदिवाकराविव ।

७. ऋत्विजः कुलपतेर्यथाक्रमं वाग्यतस्य निरवर्तयन् क्रियाः ।

८. अर्थकामसहितं सपर्यया देहबद्धमिव धर्ममभ्यगात् ।



–अनुवर्तते

९. तत्र नाहमनुमन्तुमुत्सहे मोघवृत्ति कलभस्य चेष्टितम् ।

१०. सोऽभवद्वरवधूसमागमः प्रत्ययप्रकृतियोगसन्निभः ।

**III. चतुर्णां सप्रकरणम् उत्तरं लिखत ।** **04x 10=40**

१. विश्वामित्रेण साकं रामलक्ष्मणौ कुतः प्रेषितौ ? विशदयत ।

२. अहल्या केन शप्ता ? कुतः ? स्पष्टयत ।

३. रामपरशुरामयोः संवादं काव्यक्तदिशा निरूपयत ।

४. विश्वामित्रस्य यागे विघ्नकारिणः के ?
तेषां निवारणं केन कृतम् ? विवृणुत

५. पत्नीत्रये सति चरोः द्वयोरेव विभागे कारणं किम् ? स्पष्टयत ।

६. दशरथभार्याभिः दृष्टं स्वप्नवृत्तान्तं निरूपयत ।

७. पुत्रकामेष्टिकाले देवा विष्णुं कथं तुष्टुवुः ? वर्णयत ।

८. रघुवंशकाव्यस्य एकादशसर्गस्य कथां निरूपयत ।

**IV. उत्तरं लिखत ।** **5x 2=10**

१. रक्षागृहगता दीपाः कुतः प्रत्यादिष्टा इवाभवन् ?

२. भोगिभोगसमासीनः कः ?

३. देवाः कुतः समुद्रतीरं गतवन्तः ?

४. दशरथशोकनिमित्तं किम् ?

५. रघुवंशमहाकाव्यस्य प्रणेता कः ?

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MFLS-01**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्– साहित्यशास्त्रम्

## भागः -१ , पत्रिका -१

## विषयः - सुवृत्ततिलकं काव्यमीमांसा च

**दिनाङ्कः** - 28-03-2016 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. द्वयोः सविस्तरमुत्तरं लिखत** **02 x15=30**

१. वसन्ततिलकस्य रमणीयत्वे अरमणीयत्वे च कारणानि कानि ? सोदाहरणं विवृणुत ।

२.छन्दःशास्त्रे लघुः गुरुश्च कदा भवतीति निरूप्य गणस्वरूपं सोदाहरणं निरूपयत ।

३. मालिनीं शार्दूलविक्रीडितं च कुत्र कुत्र प्रयुञ्जीत ? सदृष्टान्तं बोधयत ।

४. द्रव्यविषये त्रिपक्रारमपि कविसमयं सोदाहरणं स्फुटयत ।

**II. क) त्रीणि वृत्तानि सलक्षणोदाहरणं सप्रस्तारं च विशदयत** **03x 05=15**

१. विद्युन्माला

२. उपेन्द्रवज्रम्

३. वंशस्थम्

४. मन्दाक्रान्ता

५. स्रग्धरा

**ख) पद्यत्रयस्य तात्पर्यं विलिख्य तत्रत्यं विशेषमाविष्कुरत** **03x 05=15**

१. यद्यपि चन्दनविटपी विधिना फलकुसुमवर्जितो विहितः ।
   निजवपुषैव परेषां तथापि सन्तापमपहरति ।

२. अट्टहासच्छलेनास्याद्यस्य फेनौघपाण्डुराः ।
   जगत्क्षय इवापीताः क्षरन्ति क्षीरसागराः ।।

३. अङ्काधिरोपितमृगश्चन्द्रमा मृगलाञ्छनः ।
   केसरी निष्ठुरक्षिप्तमृगयूथो मृगाधिपः ।।

–अनुवर्तते

४. मरकतसदृशं च यामुनं स्फटिकशिलाविमलं च जाह्नवम् ।
तदुभयमुदकं पुनातु वो हरिहरयोरिव सङ्गतं वपुः ॥

५. वसन्ते शीतभीतेन कोकिलेन वने रुतम् ।
अन्तर्जलगता पद्मा श्रोतुकामा इवोद्गताः ॥

## III. उत्तरं लिखत । 05x 02=10

१. मरणस्य रगणस्य एकैकमुदाहरणं दर्शयत ।

२. श्लोकस्य लक्षणं किम् ?

३. लघुगुरुसञ्ज्ञाविधायिका कारिका का ?

४. शार्दूलविक्रीडितं कीदृशं भाति ?

५. सारस्वतप्रसरस्य चत्वारः प्रकाराः के ?

## IV. सङ्क्षिप्तमुत्तरं लिखत 10x 01=10

१. कविः मङ्गलपद्ये गणपतिगुरोः कस्मात् सुखमाशंसति ?

२. सुवृत्ततिलके कति विन्यासाः सन्ति ?

३. तगणद्वयं जगणः गुरुद्वयं च यदि क्रमेण तर्हि किं वृत्तम् ?

४. अन्तगुरुः गणः कः ?

५. सुवृत्ततिलके द्वितीयविन्यासस्य नाम किम् ?

६. शिखरिणीवृत्तस्य प्रयोगे प्रवीणः कविः कः ?

७. त्र्यक्षरैः छेदैः किं वृत्तमाभाति ?

८. कयोः रसयोः सङ्करे वसन्ततिलकं भाति ?

९. मालिनीवृत्ते कति गणाः भवन्ति ?

१०. रम्यनर्मकलभोगतर्जनी- अत्र किं वृत्तम् ?

—o—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MFLS-03**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्– साहित्यशास्त्रम्

### भागः -१ , पत्रिका -३

### विषयः - चण्डकौशिकम्

**दिनाङ्कः** - 30-03-2016 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. द्वयोः सविस्तरमुत्तरं लिखत** **02 x15=30**

१. शैब्या कुतः स्वभर्तरि कोपं गता ? कथं च स व्यपगतः ?

२. हरिश्चन्द्रः कथं राज्यात् परिभ्रष्टो बभूव ? विशदयत।

३. हरिश्चन्द्रो विश्वामित्राय दक्षिणासुवर्णं दातुं वाराणस्यां किं करोति ?

४. श्मशाने कर्म कुर्वतो हरिश्चन्द्रस्य किं किं जातम् ? विशदयत।

**II. क) सप्रसङ्गं त्रीणि वाक्यानि व्याख्यात** **03x 05=15**

१. अलं सन्तापितेन, बहुवल्लभाः खलु राजानः।

२. नूनं तापसवेषधारिणा पाखण्डेनानेन भवितव्यम्।

३. अद्यप्रभृति मे मासमवधिं क्षन्तुमर्हसि।

४. अनपराद्धं किल शैशवम्, तन्नार्हस्येवं कर्तुम्।

५. अलं व्रीडया योगचक्षुषो हि वयं विदितवृत्तान्ता एव भवतः।

**ख) सप्रसङ्गं पद्यत्रयं व्याख्यात** **03x 05=15**

१. चित्तं प्रसादयति लाघवमादधाति प्रत्यङ्गमुज्ज्वलयति प्रतिभविशेषम्।
दोषानुदस्यति करोति च धातुसाम्यमानन्दमर्पयति योगविशेषगम्यम्॥

२. गुणवद्भ्यो द्विजातिभ्यो देया रक्ष्या भयार्दिताः।
अरातिभिश्च योद्धव्यमिति मे निश्चिता मतिः॥

३. आत्मानमेव विक्रीय सत्यं रक्षामि शाश्वतम्।
तस्मिन्नरक्षिते नूनं लोकद्वयमरक्षितम्॥

–अनुवर्तते

४. चलन्ति गिरयः कामं युगान्तपवनाहताः ।
कृच्छ्रेऽपि न चलत्येव धीराणां निश्चलं मनः ॥

५. स्पन्दते वामनयनं बाहुः स्फुरति दक्षिणः ।
व्यसनाभ्युदयौ प्राप्ताविदं कथयतीव मे ॥

**III. उत्तरं लिखत ।** **05x 02=10**

१. निद्रा हि नाम प्राणिना प्रथममिदं शरीरधारणनिमित्तम्- वाक्यमिदं केन कं प्रति उक्तम् ?

२. हरिश्चन्द्रो विश्वामित्रं प्रति क्षत्त्रियस्य कार्यत्रयं किमिति वदति ?

३. विश्वामित्रो विश्वेदेवान् किमिति शशाप ?

४. हरिश्चन्द्रस्य मतेन भृत्यस्य परमो गुणः कः ?

५. हरिश्चन्द्रः कं समयं कृत्वा आत्मानं चण्डालाय विक्रीतवान् ?

**IV. सङ्क्षिप्तमुत्तरं लिखत** **10x 01=10**

१.चण्डकौशिकस्य कर्ता कः ?

२. शैब्यायाः चेटी का ?

३. विदूषकस्य नाम किम् ?

४. अथवा न विचारमर्हन्ति गुरुशासनानि-कस्येदं वचनम् ?

५. धर्मः किंवेशो भूत्वा हरिश्चन्द्रं क्रीतवान् ?

६. हरिश्चन्द्राय निशाप्रजागरं कः आदिदेश ?

७. श्मशाने का देवी प्रतिष्ठिता वर्तते ?

८. हरिश्चन्द्रस्य वञ्चनार्थं कस्तावत् वहाररूपेण प्रविशति ?

९. रोहिताश्वः केन कारणेन मृतः ?

१०. शवदाहार्थं श्मशानपालाय पुरुषाय किं देयम् ?

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MFLS-04**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्– साहित्यशास्त्रम्

## भागः -१ , पत्रिका -४

## विषयः - नीतिशतकम्

**दिनाङ्कः** - 31-03-2016 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. यथाशक्ति द्वौ विवृणुत** **02 x15=30**

१. नीतिशतके मूर्खनिन्दनं कथं कृतम् ?

२. मानमहतां सज्जनानां प्रशंसा कथं विहिता ?

३. धनस्य महत्त्वं कथं प्रदर्शितम् ?

४. विधि-कर्मणोः प्राशस्त्यं कीदृशम् ?

**II. अ आ विभागयोः यथारुचि त्रीणि त्रीणि विवृणुत** **03x 05=15**

**अ)**

१. मनुष्यरूपेण मृगाश्चरन्ति ।

२. श्रेयसामेष पन्थाः-कः ?

३. प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते ।

४. तस्य तृतीया गतिर्भवति ।

५. तत्को नाम गुणो भवेत् स गुणिनां यो दुर्जनैर्नाङ्कितः ।

**आ)** **03x 05=15**

१. कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः ।
मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ॥

२. सत्यानृता च परुषा प्रियवादिनी च हिंस्रा दयालुरपि चार्थपरा वदान्या ।
नित्यव्यया प्रचुरनित्यधनागमा च वराङ्गनेन नृपनीतिरनेकरूपा ॥

३. प्रदानं प्रच्छन्नं गृहमुपगते सम्भ्रमविधिः प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः ।
अनुत्सेको लक्ष्म्यां निरभिभवसाराः परकथाः सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥

–अनुवर्तते

४. पद्माकरं दिनकरो विकचीकरोति चन्द्रो विकासयति कैरवचक्रवालम् ।
नाभ्यर्थितो जलधरोऽपि जलं ददाति सन्तः स्वयं परहिताभिहिताभियोगाः ॥

५. गजभुजङ्गमयोरपि बन्धनं शशिदिवाकरयोर्ग्रहपीडनम् ।
मतिमताञ्च विलोक्य दरिद्रतां विधिरहो बलवानिति मे मतिः ॥

## III. द्वित्रवाक्यैरुत्तरत 05x 02=10

१. सत्सङ्गतिः कथय किं न करोति पुंसाम्- किं किं करोतीति कविः वदति ?

२. न खलु वयस्तेजसो हेतुः- अत्र उदाहरणं किम् ?

३. एतत्त्रयं जगति पुण्यकृतो लभन्ते- किं तत् त्रयम् ?

४. न्याय्यात् पथः प्रविचलन्ति पदं न धीराः- कीदृशीषु स्थितिषु सतीष्वपि ?

५. प्राप्येमां कर्मभूमिं न चरति मनुजो यस्तपो मन्दभाग्यः- अत्र उदाहरणं किम् ?

## IV. एकेन वाक्येन उत्तरं दत्त 10x 01=10

१. धिक्ताञ्च तञ्च मदनञ्च इमाञ्च माञ्च- अत्र तामिति कामाह ?

२. साक्षात्पशुः पुच्छविषाणहीनः- कः ?

३. प्रारभ्य तूत्तमजनाः न परित्यजन्ति । अन्ये किं कुर्वन्ति ?

४. विरहितः पुरुषः स एव त्वन्यः क्षणेन भवतीति विचित्रमेतत् । केन विरहितः ?

५. नानाफलैः फलति कल्पलतेव भूमिः- कं प्रतीदमुपदिश्यते ?

६. न कश्चिच्चण्डकोपानामात्मीयो नाम भूभुजाम्- अत्र उदाहरणं किम् ?

७. विनाऽप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम्- एकमुदाहरणं दत्त ।

८. ते के न जानीमहे- अत्र के ते इति शब्देन उल्लिख्यन्ते ?

९. दैवमेव हि नृणां वृद्धौ क्षये कारणम्- अत्र कस्य प्राणिनः वृत्तान्तः कविना प्रदर्शितः ?

१०. विधिरहो बलवानिति मे मतिः-किं विलोक्य इयं मतिर्जाता ?

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MFLJ-05**

# स्नातकोत्तरपरीक्षाः—२०१६

## एम्.ए. – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्— साहित्यशास्त्रम्

## भागः - २ , पत्रिका -५

## विषयः - स्वशास्त्रेतिहासः

**दिनाङ्कः** - 01-04-2016 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. उत्तरयत** **05 x02=10**

१. मम्मटोक्तं काव्यलक्षणं किम् ?

२. गङ्गालहरीति स्तोत्रकाव्यस्य कर्ता कः ?

३. शब्दचित्रं काव्यं कुतो नाद्रियन्ते कवयः ?

४. औचित्यसम्प्रदायस्य प्रवर्तकः कः ?

५. ऋषभदेवचरितमिति महाकाव्यस्य प्रणेता कः ?

**II. षण्णाम् उत्तरं लिखत** **06x 05=30**

१. काव्यस्य प्रयोजनं किम् ? विचारयत ।

२. काव्यस्वरूपे अभिप्रायभेदं विशदयत ।

३. महाकाव्यस्य लक्षणं किमिति प्रतिपादयत ।

४. चम्पूकाव्यस्य स्वरूपं सोदाहरणं स्पष्टयत ।

५. रूपकसाहित्यपरम्परां विवृणुत ।

६. रससूत्रं व्याख्यात ।

७. काव्यस्य श्रुतिमूलत्वं सयुक्तिकं प्रतिपादयत ।

८. 'सरस्वतीकण्ठाभरणम्' इति ग्रन्थस्य कर्ता कः ? तस्य देशकालादिकं विवृणुत ।

९.नीतिकाव्यानां परम्परां विवृणुत ।

१०. काव्यस्य कारणं किम् ? मतभेदेन विशदयत ।

–अनुवर्तते

**III.** **द्वयोः सविस्तरम् उत्तरं लिखत** **02x 15=30**

१. काव्यमीमांसाग्रन्थे के के विषयाः प्रतिपादिताः ? विवृणुत।

२. 'सुवृत्ततिलकम्' इति ग्रन्थस्य कर्ता कः ? तस्य देशकालादिकम् अधिकृत्य प्रबन्धमेकं लिखत।

३. साहित्यशास्त्रस्य क्रमेण विकासः कथं जात इति स्फुटयत।

४. मम्मटोक्तं काव्यलक्षणं विलिख्य व्याख्यात।

**IV.** **कालिदासस्य देशकालादिकं विलिख्य, मेघदूतकाव्यस्य वैशिष्ट्यं विवृणुत।** **1x 10=10**

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MSLS-01**

# स्नातकोत्तरपरीक्षाः—२०१६

## एम्.ए. – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्— साहित्यशास्त्रम्

## भागः -१ , पत्रिका -१

## विषयः - औचित्यविचारचर्चा

**दिनाङ्कः** - 28-03-2016 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 80

---

**I. द्वयोः सविस्तरमुत्तरं लिखत** **02x15=30**

१. औचित्यं नाम किम् ? तस्यैव काव्ये जीवितत्वं कुत्र इति समर्थयत ।

२. काव्ये औचित्यं कुत्र कुत्र सम्भवतीत्यभिधाय पदगतमौचित्यम्, अनौचित्यं च सोदाहरणं विशदीकुरुत ।

३. अलङ्कारेण सूक्तिः कथं शोभते इति प्रतिपाद्य तत्रौचित्यम्, अनौचित्यं च सोदाहरणं विशदीकुरुत ।

४. मधुमास श्वाशोलं करोत्यङ्कुरितं मनः-कः ? तत्र शृङ्गारे औचित्यतदभावौ सोदाहरणं निरूपयत ।

**II. क) त्रीन् सोदाहरणं निरूपयत** **03x 05=15**

१. वाचकौचित्यम् २. विशेषणौचित्यम्

३. नामानौचित्यम् ४. व्रतौचित्यम् ५. सम्प्रदानौचित्यम्

**ख ) पद्यत्रयस्य तात्पर्यं विलिख्य तत्रत्यं विरोधं सहेतुकमाविष्कुरुत** **03x 05=15**

१. हारो जलार्द्रवसनं नलिनीदलानि प्रालेयशीलकरमुचस्तुहिनांशुभासः ।
यस्येन्धनानि सरसानि च चन्दनानि निर्वाणमेष्यति कथं स मनोभवाग्निः ॥

२. सत्यं मनोरमा रामाः सत्यं रम्या विभूतयः ।
किन्तु मत्ताङ्गनापाङ्गभङ्गलोलं हि जीवितम् ॥

३. स्तनयुगमश्रुस्नातं समीपतरवर्ति हृदयशोकाग्नेः ।
चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम् ॥

४. नाथ निशामुखसरोरुहराजहंसः कीरीकपोलतलकान्ततनुः शशाङ्कः ।
आभाति नाथ! तदिदं दिवि दुग्धसिन्धुपिण्डीरपिण्डपरिमाण्डु यशस्त्वदीयम् ॥

५. अयि विजहीहि दृढोपगूहनं त्यज नवसङ्गमभीरु! वल्लभम् ।
अरुणकरोद्गम एष वर्तते वरतनु! सम्प्रवदन्ति कुक्कुटः ॥

–अनुवर्तते

## III. उत्तरं लिखत 05x 02=10

१. औचित्यविचारचर्चायां मङ्गलपद्यं किम् ?

२. क्षेमेन्द्रस्य सुहृत् विजयपुरेश्वरः कः ? तत्सुतश्च कः ?

३. उचितार्थविशेषेण प्रबन्धार्थः केन क इव प्रकाशते ?

४. परं परिचयाशंसी व्यवहारः सतामिव शोभते-केन कः ?

५. सान्वयं शोभते वाक्यं कैः ?

## IV. सङ्क्षिप्तमुत्तरं लिखत 05x 02=10

१. क्षेमेन्द्रेण किङ्गतमौचित्यं प्राथम्येन निरूपितम् ?

२. यो य शस्त्रं बिभर्ति स्वभुजगुरुमदात् इति पद्यं कस्य कवेः ?

३. क्षेमेन्द्रस्य अपरं नाम किम् ?

४. पदे वाक्ये प्रबन्धार्थे इति कारिकायामौचित्यं कतिषु सम्भवतीत्युक्तम् ?

५. क्षेमेन्द्रस्य पिता प्रकाशेन्द्रः कुत्र वासं करोति स्म ?

६. कस्य नृपतेः काले औचित्यविचारचर्चा कृता ?

७. जातं वंशे भुवनविदिते इति पद्यं किङ्गतस्य औचित्यस्योदाहरणम् ?

८. पुरा यत्र स्रोतः पुलिनमधुना इति पद्यं कस्य कवेः ?

९. उचितैर्वचनैः काव्यमदैन्यधन्यमनसां विदुषां किमिव चारुतामायाति ?

१०. कस्मात् अलङ्कृतिः अलङ्कृतिर्भवति

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MSLS-02**

# स्नातकोत्तरपरीक्षाः—२०१६

## एम्.ए. – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्– साहित्यशास्त्रम्

### भागः -१ , पत्रिका -२

### विषयः - विक्रमाङ्कदेवचरितम्

**दिनाङ्कः** - 29-03-2016 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 80

---

**I. द्वयोः सविस्तरमुत्तरं लिखत** **02x15=30**

१. कल्याणपुरं काव्योक्तदिशा वर्णयत।

२. बिल्हणस्य देशं कालं च विमृश्य विक्रमाङ्कदेवचरितस्य वैशिष्ट्यं विशदयत।

३. पुत्राभावेन खिन्न आहवमल्लदेवः पत्नीं किमाह ? तत्खेदापनोदाय च किं कर्तुं मतिं चकार ?

४. विक्रमादित्यः पट्टाभिषेचनाय पित्रा कथं चोदितः ? स च पितरं किमाह ?

**II. क) वाक्यत्रयं सप्रसङ्गं व्याख्यात** **03x 05=15**

१. इयं हि लक्ष्मीर्धुरि पांसुलानां केषां न चेतः कलुषीकरोति ?

२. फलं हि पात्रप्रतिपादनं श्रियः।

३. पुण्यात्मनामत्र तथाविधानां निमित्तमात्रं गुरवो भवन्ति।

४. स्वप्नेऽपि संवादयशोदरिद्रश्चन्द्रार्धचूडस्य न हि प्रसादः।

५. ऋणं पितॄणामपनेतुमक्षमाः कथं लभन्ते गृहमेधिनः शुभाः।

**ख ) पद्यत्रयस्य तात्पर्यं विलिख्य सप्रसङ्गं व्याख्यात** **03x 05=15**

१. अलं चुलुक्यक्षितिपालमण्डन श्रमेण विश्राम्यतु कर्कशं तपः।
कमप्यपूर्वं त्वयि पार्वतीपतिः प्रसादमारोहति भक्तवत्सलः॥

२. त्रिलोकलक्ष्म्येव सलीलवीक्षितः कृतद्रवैश्चन्द्रकरैरिवाप्लुतः।
अदूरवाञ्छालतिकाफलोदयः क्वचिन्न माति स्म मुदा नरेश्वरः ॥

३. तस्मिन् प्रविष्टे मलयाद्रिकुञ्जं तद्वाहिनीकुञ्जरकर्णतालैः।
वियोगिनीनामुपतापनाय चैत्रं विना चन्दनवायुरासीत् ॥

४. अवागुरं नेत्रकुरङ्गबन्धनं निरक्षरं पञ्चशरस्य शासनम्।
गृहे गृहे यत्र विचित्रमन्वहं वितन्वते नृत्तमधीरलोचनाः॥

–अनुवर्तते

५. उच्चैः स्थितं तस्य किरीटरत्नं तेजोधनानामुपरि स्थितस्य ।
क्षमामिव प्रार्थयितुं लुलोठ सङ्क्रान्तिभङ्ग्या मणिपादपीठे ॥

## III. विग्रहं विलिख्य समासनाम लिखत 05x 02=10

१. तारकापतौ　२. अधीतवेदः　३. लोकस्तुताम्

४. भूशेषयोः　५. मृगाङ्कमौलिः

## IV. सङ्क्षिप्तमुत्तरं लिखत 05x 02=10

१. विक्रमादित्यस्य अग्रजः कः ?

२. विक्रमादित्यः कस्मिन् वंशे जातः ?

३. रामस्य पित्रा क्रमं समुल्लङ्घ्य आत्मराज्ये कोऽभिषिक्तः ?

४. त्रिषु पुत्रेषु विक्रमादित्यः कतमः ?

५. विक्रमाङ्कदेवचरिते कति सर्गाः सन्ति ?

६. आहवमल्लदेवस्य सुतद्वयं किंसम्भवम् ?

७. विक्रमादित्यः शरणमागतं कम् अकण्टके राज्ये स्थापयति ?

८. बहवः क्षितीशाः कस्मात् छलात् विक्रमादित्याय सर्वस्वदानं चक्रुः ?

९. द्वितीयः सर्गः केन वृत्तेन बद्धः ?

१०. विक्रमादित्यस्य पदातिभिः का पुरी देवालयध्वजपटावलिमात्रशेषा कृता ?

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 2

**Code No. : MSLS-03**

# स्नातकोत्तरपरीक्षाः—२०१६

## एम्.ए. – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्– साहित्यशास्त्रम्

### भागः -१ , पत्रिका -३

### विषयः - कादम्बरीसङ्ग्रहः

**दिनाङ्कः** - 30-03-2016 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 80

---

**I. एषु पञ्चदश प्रश्नाः समाधेयाः** **02x15=30**

१. विदिशा कया नद्या परिवृता ? तस्याः राजा कः ?

२. शुकः दक्षिणं चरणमुन्नम्य विदिशापतिं किमाह ?

३. अग्निशापात् शुकानां करिणां च किमुपजातम् ?

४. अगस्त्याश्रमः कुत्र आसीत् ? अगस्त्यस्य पत्नी का ?

५. उज्जयिन्याः राजा कः ? तस्यामात्यः कः ?

६. मकरिका का ? तस्याः उद्योगः कः ?

७. अपुत्राणां गतिः का ? पुत्रशब्दार्थः कः ?

८. जन्मान्तरकृतं कर्म कदा फलमुपनयति ?

९. कदा इष्टाः स्वप्नाः अवितथफला भवन्ति ?

१०.विलासवतीगर्भवृत्तान्तं तारापीडाय न्यवेदयत् का ?

११. तारापीडः स्वपुत्रस्य नाम किं चक्रे ? कुतः ?

१२. पत्रलेखा कस्य दुहिता ? तां विलासवती कस्मै प्रादात् ?

१३. राजप्रकृतिः कीदृशी अस्ति ?

१४. उपदेशाय योग्यः कालः को भवति ?

१५. शिवालये चन्द्रापीडः कां ददर्श ? तस्या नाम किम् ?

१६. कुत्र गन्धर्वाः प्रतिवसन्ति ?

१७. कादम्बर्याः पितरौ कौ ?

१८. गौरीहंसौ कौ ?

१९. हारीतः कः ? सः कं ररक्ष ?

–अनुवर्तते

**II. यथानिर्देशं लिखत** **05x 02=10**

१. बाणस्य देश-काल-कृति-प्रशंसा अधिकृत्य लिखत।

२. गद्यकाव्येषु कादम्बर्याः स्थानं वैशिष्ट्यं च विशदयत।

**III. एषु पञ्च प्रश्नाः समाधेयाः** **05x 06=30**

१. रुदतीं विलासवतीं तारापीडः कथं सान्त्वयामास ?

२. उज्जयिनीं वर्णयत।

३. अधिकारारूढा नृपाः कथं वर्तन्ते ? वर्णयत।

४. महाश्वेताया वृत्तान्तं सङ्गृह्य लिखत।

५. शाल्मलीवृक्षस्य पक्षिकुलं कथं विनष्टम् ? वर्णयत।

६. शुकनासः लक्ष्मीविषये किमुक्तवान् ? यथाग्रन्थं वर्णयत।

७. कपिञ्जलोक्तं पुण्डरीकजन्मवृत्तान्तं लिखत।

८. कामाविष्टं पुण्डरीकं कपिञ्जलः किमुक्तवान् ? लिखत।

९. विन्ध्याटवीं यथाग्रन्थं वर्णयत।

१०. यथाग्रन्थं शूद्रकं वर्णयत।

**IV. यथानिर्देशं लिखत**

**(अ) विग्रहं प्रदर्श्य समासनाम लिखत** **02x01=02**

१.अधीतसर्वशास्त्रः २. कमलमधुपानमत्तानाम्

**(आ) अत्रत्यमलङ्कारं विवृणुत** **02x02=04**

१. विलासवती हरजटाकलापस्य चन्द्रलेखेव भूषणमभूत्।

२. लक्ष्मीरियं व्याधगीतिरिन्द्रियमृगाणाम्।

**(इ) व्याकरणविशेषं लिखत** **02x02=04**

१. इत्थं चिन्तयत्येव मयि हारीतः आगतः।

२. ओं नमो भगवते महारुद्राय।

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : MSLS-04**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए. – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्– साहित्यशास्त्रम्

## भागः -१ , पत्रिका -४

## विषयः - चम्पूरामायणम्

**दिनाङ्कः** - 31-03-2016 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 80

---

**I. सङ्क्षिप्तोत्तरं लिखत** **10x01=10**

१. चम्पूरामायणे काण्डानि कति ?

२. निगमशब्दस्य कोऽर्थः ?

३. जगति उच्चैर्गतिः कुतः सिद्ध्यति ?

४. वाद्यकलया कलिता का हृद्या ?

५. नटः पितॄणां तर्पणं कैः विदधाति ?

६. 'मा निषाद' इति श्लोके 'मा'पदस्य कोऽर्थः ?

७. 'अथ सरसिजयोनेराज्ञया रामवृत्तम्' इति पद्ये किं छन्दः ?

८. कुशीलवौ कौ ?

९. उत्तरकोसलेषु विद्यमाना प्रशस्ता पुरी का ?

१०. चम्पूरामायणं केन लिखतम् ?

**II. श्लोकपञ्चकं व्याख्यात** **05x 05=25**

१. एते ववृधिरे वीरा ब्रह्मक्षेमाय दीक्षिताः।
लोकानन्दमुकुन्दस्य चत्वार इव बाहवः॥

२. योगेन लभ्यो यः पुंसां संसारापेतचेतसाम्।
नियोगेन पितुः सोऽयं रामः कौशिकमन्वगात्॥

३. सङ्क्रान्तवर्णान्तरगाधिसूनोः सम्पर्कपुण्यादिव रामभद्रः।
क्षात्रक्रमात् पिप्पलदण्डयोग्यः पलाशदण्डादृतपाणिरासीत्॥

४. ततो गोकर्णमासाद्य तपस्यति भगीरथे।
देवो देवापगां वोढुमन्वमंस्त दयानिधिः॥



–अनुवर्तते

५. अलब्धनिर्गमा शम्भोः कपर्दादमरापगा ।
दधौ दूर्वाशिखालग्नतुषारकणिकोपमाम् ॥

६. तासु प्राचीं गतास्तिस्रस्तिस्रः प्राचेतसीं दिशाम् ।
अन्या पितृक्रियोद्युक्तभगीरथपथानुगा ॥

## III. चम्पूरामायणकाव्यस्य वैशिष्ट्यं विवृणुत 01x 10=10

## IV. सप्रसङ्गं गद्यभागं विवृणुत 01x15=15

अथ दशरथः तनयैः सह कृतविवाहैर्विदेहेभ्यः प्रतिनिवर्तमानः संवर्तसमयसमुज्जृम्भितहुत-वहदुःसहरोषं भीषणदुर्वारपराक्रमं क्षत्रवर्गगर्वसर्वङ्कषपरश्वधधाराधीनरुधिरधाराकल्पितपितृतर्पणं दर्पवतामग्रेसरमुग्रप्रतापिनं तपःसमुचितवल्कलवसनमपि वासनावशादनतिपरिमुषितयुद्धश्रद्धं मध्येमार्गं भार्गवं मुनिं राममद्राक्षीत् ॥

## V. टिप्पणीं लिखत (चतुर्णाम्) 04x15=20

१. भोजः २. दशरथः ३. सुमन्त्रः

४. विश्वामित्रः ५. ताटका ६. मङ्गलम्

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : MSLJ-05**

# स्नातकोत्तरपरीक्षाः—२०१६

## एम्.ए. – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्—सहित्यशास्त्रम्

## भागः -२ , पत्रिका -५

## विषयः - रामायणम्, महाभारतम्

**दिनाङ्कः** - 01-04-2016 ] [ **गरिष्ठाङ्काः - ८०**

**समयः**- 02.30 P.M. to 05.30 P.M. ] [ Max. Marks : 80

---

### प्रथमो भागः-रामायणम्

**I. एकवाक्यात्मकं उत्तरं लिखत** **10x01=10**

१. हनूमान् किमन्वेष्टुं चारणाचरिते पथि इयेष ?

२. 'निष्प्रमाणशरीरः' इत्यस्य कोऽर्थः ?

३. कानि नागानां विषं शमितुं न शेकुः ?

४. कः गरुडेन ह्रियमाणो महोरगः इव ददृशे ?

५. हनूमान् आकाशमवलोकयन् कान् हृदये रुरोध ?

६.प्लवमानं तं दृष्ट्वा के पुष्पाणि ववृषुः ?

७. लवणाम्भसः वचो निशम्य कः जालात्तूर्णं उत्पपात ?

८. शतक्रतुः पर्वतानां पक्षान् किमकरोत् ?

९. हनूमतः बलं जिज्ञासमाना नागमाता का ?

१०. किं आदिकाव्यमिति प्रसिद्धम् ?

**II. सप्रसङ्गं श्लोकद्वयं व्याख्यात** **02x 10=20**

१. प्लवगप्रवरैर्दृष्टः प्लवने कृतनिश्चयः ।
ववृधे रामवृद्ध्यर्थं समुद्र इव पर्वसु ॥

२. स नानाकुसुमैः कीर्णः कपिः साङ्कुरकोटकैः ।
शुशुभे मेघसङ्काशः खद्योतैरिव पर्वतः ॥

३. साहाय्यं वानरेन्द्रस्य यदि नाहं हनूमतः ।
करिष्यामि भविष्यामि सर्ववाच्यो विवक्षताम् ।

–अनुवर्तते

**III. द्वयोः टिप्पणीं लिखत** **02x 05=10**

१. सुन्दरकाण्डम् २. वाल्मीकिः

३. रामः ४. लङ्का

## द्वितीयो भागः-महाभारतम्

**IV. रिक्तस्थानानि पूरयत** **10x 01=10**

१. महाभारते..........अधिकाः श्लोकाः सन्ति ।

२. श्रीकृष्णः........नगरस्य राजा ।

३. युधिष्ठिरस्य सभाभवनस्य निर्माता .........।

४. पाण्डवैः कृतः यागः.............।

५. शिवेन पार्थाय................अस्त्रं दत्तम् ।

६. शक्रस्य दिव्यसभायाः निर्माता...........।

७. सहस्रनयनः इति पदं........सञ्ज्ञा ।

८. भगवद्गीता .......पर्वणि वर्तते ।

९. धर्मक्षेत्रे......क्षेत्रे समवेता युयुत्सवः ।

१०. महाभारतस्य लेखकः...........।

**V. सप्रसङ्गं श्लोकत्रयं व्याख्यात** **03x10=30**

१. विस्तीर्णा योजनशतं शतमध्यर्धमायता ।
वैहायसी कामगमा पञ्चयोजनमुच्छ्रिता ।।

२. स्तुतिभिर्मङ्गलैश्चैव स्तुवन्तः कर्मभिस्तथा ।
विक्रमैश्च महात्मानं बलवृत्रविषूदनम् ।।

३. अन्तः सलिलमास्थाय विहिता विश्वकर्मणा ।
दिव्यै रत्नमयैर्वृक्षैः फलपुष्पप्रदैर्युता ।।

४. गीतवादित्रवन्तश्च गन्धर्वाप्सरसां गणाः ।
स्तुवन्तो वरुणं तस्यां सर्व एव समासते ।।

—०—